प्रत्याध्मानगरोदराश्मरियुतांस्तूनीद्वयारोच-
कान् ।
ऊरुस्तम्भमतिभ्रमञ्च मनसो बाधिर्य्यमष्ठीलिकां
प्रत्यष्ठीलिकया सहापहरते प्राक्पीतमुष्णा-
म्बुना ॥
हृत्कुक्षिवंक्षणकटीजठरान्तरेषु
वस्तिस्तनांशफलकेषु च पार्श्वयोश्च ।
शूलानि नाशयति वातवलासजानि
हिङ्ग्वाद्यमाद्यमिदमाश्विनसंहितोक्तम् ॥”
हिङ्ग्वादिचूर्णम् ॥ * ॥
“धीमानुपचरेद्गुल्मं प्रत्येकञ्च त्रिदोषजम् ।
सन्निपातोत्थिते गुल्मे त्रिदोषघ्नो विधिर्हितः ॥
शरपुङ्खस्य लवणं पथ्याचूर्णं समं द्वयम् ।
शाणप्रमाणमश्नीयाच्चूर्णं गुल्मगदापहम् ॥
स्वर्जिका शाणमाना स्यात्तावदेव गुडं भवेत् ।
उभयोर्व्वटिकां खादेद्गुल्मामयविनाशिनीम् ॥ *
पलाशवज्रीशिखरिचिञ्चार्कतिलनालजाः ।
यवजः स्वर्जिका चेति क्षारा अष्टौ प्रकीर्त्तिताः ॥
गुल्मशूलहराः क्षारा अजीर्णस्य च पाचनाः ।”
क्षाराष्टकम् ॥ * ॥
“सामुद्रं सैन्धवं काचं यवक्षारः सुवर्च्चलम् ।
टङ्कणं स्वर्जिकाक्षारं तुल्यं चूर्णं प्रकल्पयेत् ॥
वज्रीक्षीरैरर्कक्षीरैरातपे भावयेत् त्र्यहम् ।
वेष्टयेदर्कपत्रेण रुद्ध्वा भाण्डपुटे पचेत् ॥
तत्क्षारं चूर्णयेत् पश्चात् त्र्यूषणं त्रिफलां
तथा ।
यवानी जीरकौ वह्निश्चूर्णमेषाञ्च कारयेत् ॥
सर्व्वचूर्णसमं क्षारं सर्व्वमेकत्र कारयेत् ।
तच्चूर्णं टङ्कयुगलं सलिलेन प्रयोजयेत् ॥
गुल्मे शूले तथाजीर्णे शोथे सर्व्वोदरेषु च ।
मन्दे वह्नावुदावर्त्ते प्लीह्नि चापि परं हितम् ॥
वातेऽधिके जलैः कोष्णैर्हितं पित्तेऽधिके घृतैः ।
गोमूत्रेण कफाधिक्ये काञ्जिकेन त्रिदोषजे ॥
वज्रक्षार इति ख्यातः प्रोक्तः पूर्व्वं स्वयम्भुवा ।
सेवितो हरतेऽजीर्णं तथाजीर्णभवान् गदान् ॥”
वज्रक्षारः ॥ * ॥
“सुवर्च्चिका टङ्कमिता शाणमानार्द्रिकापि च ।
उभे भुञ्जीत युगपद्गुल्मामयनिवृत्तये ॥”
सुवर्च्चिका सोरा इति लोके ।
“शुक्तिकाचूर्णगुटिकां टङ्कमात्रां सुवेष्टयेत् ।
गुडेन शाणमानेन ताञ्जिलेत् गुल्मरोगवान् ॥
गुल्मी कुमारिकामांसं कर्षार्द्धं गोघृतान्वितम् ।
गिलेत् चोषाभयासिन्धुसूक्ष्मचूर्णावधूलितम् ॥
कुमारिका घिउकुँयारी इति लोके ॥ * ॥
“वल्लूरं मूलकं मत्स्यं शुष्कशाकानि वैदलम् ।
न खादेदालुकं गुल्मी मधुराणि फलानि च ॥
वैदलानां निषेधेऽपि माषकुलत्थयोर्म्मात्रनिषेधः ।
इति सुश्रुतटीका । इति गुल्माधिकारः ॥ इति
भावप्रकाशः ॥
अथ गुल्मचिकित्सा ।
आत्रेय उवाच ।
“व्ययधृत्योपचारैश्च दोषैः संकुप्यतेऽनिलः ।
मन्दाग्निना हि जठरे जायते गुल्मरुङ् नृणाम् ॥
उदरं गर्ज्जते यस्य विषमाग्निश्च दृश्यते ।
तोदो वपुषि शूलञ्च वातगुल्मं विनिर्द्दिशेत् ॥
शोषोऽरतिः सपीतत्वं मन्दज्वरनिपीड़ितम् ।
तमोभ्रमपिपासार्त्तं गुल्मं तत् पित्तसम्भवम् ॥
शोफो जाड्यञ्च हृल्लासं तन्द्रालस्यं सशीतकम् ।
मन्दाग्निविड्विबन्धश्च गुल्मं तत् श्लेष्मसम्भवम् ॥
मोहो विभ्रमता जाड्यमरतिस्तृतृपिपासकम् ।
आलस्यं निद्रया चैवं गुल्मं तत् कफपैत्तिकम् ॥
निद्रालस्यञ्च दाहञ्च शोथात् शूलञ्च सज्वरम् ।
वैवर्ण्यमरतिर्जाड्यं विड्बन्धो विकलाङ्गता ॥
तथातीसारमूर्च्छा च तृषाहृल्लासवेपथु ।
श्वासोऽरुचिरजीर्णत्वं गुल्मं तत्सान्निपातिकम् ॥
साध्यं केवलदोषोत्थं द्वन्द्वं कष्टेन सिध्यति ।
असाध्यं सन्निपातोत्थं वक्ष्यामस्तत्प्रतिक्रियाम् ॥
यज्ञत्चिकित्सितञ्चैव कथितञ्चोपचारणम् ।
तद्वत्प्लीहा समाख्यातो न चात्र कथितं पुनः ॥
चिकित्सोदरगुल्मस्य वक्ष्यते शृणु साम्प्रतम् ।
स्नेहनं रुक्षणञ्चैव पाचनं शोधनानि च ॥
संशमनं विरेकञ्च वस्ति-स्नेह-निरूहणम् ।
क्षये पानञ्च चूर्णानि गुल्मोपचरणक्रिया ॥
शुण्ठीमूर्व्वा पञ्चमूलं लघुरास्ना च दारु च ।
क्वाथोऽस्य चावशेषः स्यात् तत्समं क्षीरमेव च ॥
दधितत्सममेवन्तु पाचयेत्तत्समाग्निना ।
घृतं यावत् प्रपश्येच्च सिद्धमुत्तार्य्यते ततः ॥
तत्कृतं पानकेऽभ्यङ्गे भोजने च प्रदापयेत् ।
स्नेहं सप्तदिनं यावत् तस्माच्च रूक्षणं हितम् ॥
दिनत्रयञ्च कर्त्तव्यं कथयाम्यत्र कोविद ! ।
शुण्ठी सौवर्च्चलं जीरे द्वे वा हिङ्गुसमन्वितम् ॥
काञ्जिकं पानमेतेषां रूक्षणं गुल्मशान्तये ।
गुल्मचिकित्सिते क्षारपाकोऽत्र प्रतियुज्यते ॥
क्षारं पलाशार्ज्जुनशूरणस्य
क्षारं तथा वै सहयावशूकम् ।
सौवर्च्चलं सिन्धुभवोद्भिदञ्च
सामुद्रजं वापि विमिश्रयेच्च ॥
तोयं परिस्राव्य विधानतोऽपि
युक्तं तथैतानि सहौषधानि ।
पथ्याग्निशुण्ठी रजनीसुराह्वं
कुष्ठं विशाला च यवानिका च ॥
तथाजमोदा सहजीरके द्वे
षड्ग्रन्थिका हिङ्गुयुतञ्च चूर्णम् ।
क्षारोदकौ पानविमिश्रपानं
निहन्ति सर्व्वाण्यपि कोष्ठजानि ॥
गुल्मानि सर्व्वाणि विसूचिकानां
मन्दाग्निशूलानि भगन्दराणाम् ।
प्लीहोदरानाहमथो विबन्धं
विनाशनो रोगचयं नराणाम् ॥”
इति विरूक्षणम् ॥ * ॥
अथ विरेचनानि वक्ष्यामः ॥ * ॥
“नागरं क्रिमिजित् पथ्या त्रिवृता त्रिगुणायुतम् ।
चूर्णं गुड़ान्वितं देयं वातगुल्मविरेचनम् ॥
दन्ती च भागमेकञ्च द्वौ भागौ च हरीतकी ।
त्रिवृतायास्त्रिभागः स्यात् शुण्ठ्याश्चत्वार एव च ॥
प्रक्षिप्य सर्व्वमेकत्र सर्व्वतुल्यगुडेन तु ।
वटकं भक्षयेत् प्रातस्तस्योपरि जलं पिवेत् ॥
कथितश्च विरेकश्च वातगुल्मोपशान्तये ।”
इति वातगुल्मविरेचनम् ॥ * ॥
“पिवेदेरण्डतैलञ्च सर्कराक्षीरसंयुतम् ।
पित्तगुल्मविरेकाय श्रेष्ठमेतत् सुखावहम् ॥
आरग्वधं प्रवालानि तथैवारग्वधानि च ।
विभाव्यैरण्डतैलेन तत्पत्रैश्चैव वेष्टयेत् ॥
कर्द्दमेन प्रलिप्याथ अङ्गारेषु निधापयेत् ।
सुस्विन्नभर्ज्जितां ताञ्च भक्षयेत् शर्करान्विताम् ॥
विरेकं पैत्तिके गुल्मे हितं शुद्धविरेचनम् ।”
इति पित्तगुल्मविरेचनम् ॥ * ॥
“त्रिफला सुरसा शुण्ठी चूर्णं कृत्वा विभावयेत् ।
स्नुहीक्षीरेण वारैकं गुड़ेन सह मिश्रितम् ॥
विरेकः श्लेष्मगुल्मे च सर्व्वोदरविनाशनम् ।
शुण्ठी सौवर्च्चलं पथ्या विड़ङ्गञ्च पुनर्नवा ॥
चूर्णोऽपामार्गबीजानां स्नुहीक्षीरेण भावितः ।
गुड़ेन संयुतं खादेत् पश्चात् सोष्णं जलं पिवेत् ॥
विरेकः सर्व्वगुल्मेषु प्रशस्तो हितकारकः ॥
इति विरेचनम् । [ कोकिला
शुक्तिक्षारनिशाविशालकदली स्यात् शूरणं
पालाशं दहनार्ज्जुनं शठिजयाऽपामार्गकुष्मा-
ण्डकम् ।
दग्ध्वाक्षारविपाचितं परिस्रुतं हिङ्गुत्रिकट्वन्वितं
गुल्मानाहविबन्धशूलहरणं सर्व्वोदराणां हितम् ॥
इति क्षारपानम् ॥ * ॥
“अजमोदा शठी दन्ती विड़ङ्गं शुष्कितुम्बुरु ।
त्रिफला चित्रकश्चैव शुण्ठी कर्कटशृङ्गिका ॥
त्रिवृता च सुराह्वा च पुष्करं वृद्धदारकम् ।
तथाम्लवेतसश्चैव तिन्तिड़ीकञ्च चिञ्चिलिः ॥
समन्तु मातुलुङ्गेन विभाव्यमेकतः कृतम् ।
त्रिभागहिङ्गुसंयुक्तं घृतेन चूर्णितं हितम् ॥
निहन्ति वातगुल्मञ्च सशूलमुदरन्तथा ।”
इत्यजमोदादि ॥ * ॥
हिङ्गुफलत्रिकजीरकयुग्मं
चित्रकभागिककुष्ठविड़ङ्गम् ।
तुम्बुरुपुष्कर-विश्वसुराह्वं
क्षारयुतं लवणानि च पञ्च ॥
वातिकगुल्मविनाशनहेतुः
शूलरुजञ्च नरस्य निहन्ति ॥”
इति वातगुल्मचिकित्सा ॥ * ॥
“विदारी क्षीरशुक्ला च पथ्या विश्वौषधं मधु ।
लेहः पित्तात्मके गुल्मे हितः शोफनिवारणः ॥
यष्टिकं निम्बपत्राणि तथा धात्रीफलं सिता ।
चूर्णं मध्वावलीढ़ञ्च पित्तगुल्मनिवारणम् ॥”
इति पित्तगुल्मचिकित्सा ॥ * ॥
“त्रिकटुत्रिफलाचित्रवटकट्फलसंयुतम् ।
चूर्णं मद्येन वा पीतं फलक्वाथेन वा पीतम् ॥
श्लेष्मगुल्मविनाशाय हितञ्चैतत् सुखावहम् ।
लोध्रञ्च कट्फलं विश्वा कुष्ठं चित्रकमेव च ॥
नागरं हिङ्गुसंयुक्तं चूर्णं मूत्रेण संयुतम् ।